# अनुशासनम्

अनु उपसर्गपूर्वकं ''शास्'' धातोः अनुशासनम् इति शब्दः निर्मितः। अस्य अभिप्रायः शासनानुसरणम् नियमपूर्वकं कार्यं वा। अतः नियमानां पालनमेव अनुशासनम्। आत्मनियन्त्रण– मेवानुशासनम्।



अनुशासनस्य द्वौ भेदौ स्तः, आन्तरिकं वाह्यं च। वाह्यानुशासनं परिवारेषु विद्यालयेषु च परिलक्ष्यते। आत्मानुशासनमेव दृढम् अनुशासनमभिधीयते। आत्मानुशासितमानवः संयमशीलः भवतीति। संयमशीलः शरीरबुद्धि–मनांसि नियन्त्रयति। आत्मानुशासनम् कल्याणप्रदमस्ति।

अनुशासनं बिना समाजस्य राष्ट्रस्य वा उन्नतिः न संभवति। मानवजीवने अनुशासनं महत्वपूर्णमस्ति। यथा सृष्टेः कार्यम् अनुशासनेनैव सञ्चाल्यते तथैव जनानां जीवनं अनुशासनाद् ऋते कदापि सञ्चालयितुं न शक्यते। अनुशासनेनैव जीवनं सुव्यवस्थितं परिलक्ष्यते। सुव्यवस्थित–जीवनमेव विकासस्तम्भः अस्ति। अनुशासनेन कर्त्तव्यअधिकारयोः बोधो भवति। अतः अनुशासनम् उन्नत्याः द्वारमस्ति। अनुशासनेन व्यवहारे शीलं–सत्यं विनयञ्च संवर्ध्यन्ते।

छात्रजीवने अनुशासनस्य सर्वाधिकं महत्त्वमस्ति। छात्रजीवने एव भविष्यमवलम्बितमस्ति। अनुशासनप्रियाः छात्राःसाफल्यं प्राप्नुवन्ति। विद्यार्थिनः गृहे–विद्यालये क्रीडाङ्गणे च अनुशासनं गृह्णन्ति। समयानुकूल–पठनं, विद्यालयगमनं, क्रीडनं गृहकार्यञ्च सम्पादितव्यम्। गुरुमातृपितृणाम् आदरःकर्त्तव्यः। एतेषां कर्त्तव्यानां पालनमेव अनुशासनम् इति। यातायातनियमपरिपालनं, विद्यालयनियमपरिपालनं, गृहनियमपरिपालनं वा अनुशासनम् एव। अनुशासितछात्राः विनयशीलाः धैर्यशीलाः, संयमशीलाश्च भवन्ति।

उच्छृङ्खलत्वं कदापि साफल्यप्रदं न भवति।

अतएव अनुशासनं सुजीवनस्य कुञ्जिकाऽस्ति। अनुशासनं व्यक्तित्वविकासस्य सशक्तसाधनमस्ति। अनुशासनेन आचरणे 'सत्यं, शिवं, सुन्दरम्' इति उक्तिः चरितार्था भवति। अनुशासनस्य वैशिष्ट्यं सर्वे स्वीकुर्वन्ति। यद् अनुशासनं ऋते जीवनं शून्यमस्ति। अतएव अस्माभिः सर्वतोभावेन अनुशासनं परिपालनीयमिति।

## शब्दार्थाः

अनुसरति = पीछे चलना या अनुसरण करना। आत्मनियन्त्रणम् = अपने को वश में रखना। शक्यते =सकता है। विकासस्तम्भः विकास का आधार। सञ्चाल्यते = संचालित होता है। परिलक्ष्यते = दिखाई देता है। साफल्यम् = सफलता। क्रीडनम् = खेलना। उच्छृङ्खलत्वम् = उद्दण्डता। स्वीकुर्वन्ति = स्वीकार करते हैं। ऋते = बिना। सर्वतोभावेन = समग्रभाव से।

## अभ्यासप्रश्नाः

**(1) निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए –**

(क) अनुशासनम् इति शब्दः कथं निर्मितः ?

(ख) आत्मानुशासितः मानवः कीदृशः भवति ?

(ग) अनुशासनेन किं संवर्ध्यते ?

(घ) अनुशासनप्रियछात्रः किं प्राप्नोति ?

(ङ) अनुशासन इति शब्देन का उक्तिः चरितार्था ?

**(2) रिक्त स्थानों की पूर्ति कीजिए –**

(क) अतः नियमानां ............... अनुशासनम्।

(ख) आत्मानुशासनम् ............... भवति।

(ग) अनुशासनम् उन्नत्याः ............... अस्ति।

(घ) उच्छृङ्खलत्वं कदापि ............ न भवति।

(ङ) अनुशासनस्य ............... सर्वे स्वीकुर्वन्ति।

**(3) (अ) संधि विच्छेद कर प्रकार लिखिए–**

(1) आत्मानुशासनम् (2) सर्वाधिक (3) गृहकार्यञ्च (4) पालनमेव (5) शून्यमस्ति।

**(ब) समास विग्रह कर समासों के नाम लिखिए –**

(1) आत्मनियन्त्रणम् (2) मानवजीवने (3) शीलसत्यम् (4) समयानुकूलं

**(4) संस्कृत में अनुवाद कीजिए –**

(क) मानव जीवन में अनुशासन महत्वपूर्ण है।

(ख) नियमों का पालन अनुशासन है।

(ग) अनुशासन सफलता की कुञ्जी है।

(घ) अनुशासित छात्र विनयशील होता है।

(ङ) हमें अनुशासन का पालन करना चाहिए।

Q96BZG